# Saubhagyavidya Kamakshi Stotram

अगस्त्य उवाच

अनाद्यनन्तमव्यक्तं व्यक्तानामादिकारणम् ।

आनन्दबोधैकरसं तन्महन्मन्महे महः ॥

अश्वानन महाप्राज्ञ वेदवेदान्तवित्तम ।

श्रुतमेतन्महापुण्यं ललिताख्यानमुत्तमम् ॥

सर्वपूज्या त्वया प्रोक्ता त्रिपुरा परदेवता ।

पाशाङ्कुशधनुर्बाणपरिष्कृतचतुर्भुजा ॥

तस्या यन्त्रमिति प्रोक्तं श्रीचक्रं चक्रभूषणम् ।

नवावरणमीशानीश्रीपुरस्याधिदैवतम् ॥

काञ्चीपुरे पवित्रेऽस्मिन् महीमण्डलमण्डने ।

केयं विभाति कल्याणी कामाक्षीत्यभिविश्रुता ॥

द्विभुजा विद्युदुल्लासविलसत्तनुवल्लरी ।

अदृष्टपूर्वसौन्दर्या परञ्ज्योतिर्मयी परा ॥

अगस्त्येनैवमुक्तः सन् परानन्दादृतेक्षणः ।

ध्यायंस्तत्त्रैपुरं तेजो हयग्रीवो महामनाः ।

इति ध्यात्वा नमस्कृत्य तमगस्त्यमथाब्रवीत् ॥

हयग्रीव उवाच

रहस्यं संप्रवक्ष्यामि लोपामुद्रापते शृणु ।

आद्या पुण्यपरा सा स्याच्चित्परा त्वादिकारणम् ॥
अनाख्येति त्रयीप्रोक्तस्वरूपा तत्त्वचिन्तकैः ।
द्वितीया भूतले सिद्धा परा द्विभुजसंयुता ॥
दक्षहस्ते योगमुद्रां वामहस्ते तु पुस्तकम् ।
बिभ्रती हिमकुन्देन्दुमुक्तासमवपुर्द्युतिः ॥
परापरा तृतीया स्याद्बालार्कायुतसम्मिता ।
सर्वाभरणसंयुक्ता दक्षहस्तधृताम्बुजा ॥
वामोरुन्यस्तहस्ता च किरीटार्धेन्दुभूषणा ।
पश्चाच्चतुर्भुजा जाता सा परा त्रिपुरारुणा ॥
पाशाङ्कुशेक्षुकोदण्डपञ्चबाणलसत्करा ।
ललिता सैव कामाक्षी काञ्च्यां ख्यातिमुपागता ॥
सरस्वतीरमागौर्यस्तामेवाद्यामुपासते ।
रहस्यं संप्रवक्ष्यामि लोपामुद्रापते शृणु ॥
नेत्रद्वयं महेशस्य काशीकाञ्चीपुरीद्वयम् ।
विख्यातं वैष्णवं क्षेत्रं शिवसान्निध्यकारकम् ॥
काञ्चीक्षेत्रे पुरा धाता सर्वलोकपितामहः ।
श्रीदेवीदर्शनार्थाय तपस्तेपे सुदुष्करम् ॥
आत्मैकध्यानयुक्तस्य तस्य व्रतवतो मुने ।
प्रादुरास पुरो लक्ष्मीः पद्महस्तपुरस्सरा ॥
पद्मासने च तिष्ठन्ती विष्णुना जिष्णुना सह ।
सर्वशृङ्गारवेषाढ्या सर्वाभरणभूषिता ॥

सिंहासनेश्वरी ख्याता सर्वलोकैकरक्षिणी ।
तां दृष्ट्वाद्भुतसौन्दर्यां परञ्ज्योतिर्मयीं पराम् ॥
आदिलक्ष्मीमिति ख्यातां सर्वेषां हृदयस्थिताम् ।
यामाहुस्त्रिपुरामेव ब्रह्मविष्ण्वीशमातरम् ।
कामाक्षीति प्रसिद्धां तामस्तौषीत्पूर्णभक्तिमान् ॥

ब्रह्मोवाच

मय देवि जगन्मातर्जय त्रिपुरसुन्दरि ।
जय श्रीनाथसहजे जय श्रीसर्वमङ्गले ॥
जयेशे करुणाराशे जय शृङ्गारनायिके ।
जय विद्यैकसिद्धेशि वन्दनीयपदे शुभे ॥

जय जय जगदम्ब नित्यरूपे
जय जय सन्नुतलोकसौख्यदात्रि ।
जय जय हिमशैलकीर्तनीये
जय जय शङ्करवामनेत्रे ॥

जगज्जन्मस्थितिध्वंसविधानानुग्रहान्मुहुः ।
या करोति स्वसङ्कल्पात् तस्यै देव्यै नमो नमः ॥ १ ॥
वर्णाश्रमाणां साङ्कर्यकारिणः पापिनो जनान् ।
निहन्ति याऽतितीक्ष्णास्त्रैः तस्यै देव्यै नमो नमः ॥ २ ॥

नागमैश्च न वेदैश्च न शास्त्रैर्न च योगिभिः ।
न वेद्या या स्वसंवेद्या तस्यै देव्यै नमो नमः ॥ ३ ॥
रहस्याम्नायवेदान्तैः तत्त्वविद्भिर्मुनीश्वरैः ।
परं ब्रह्मेति या ख्याता तस्यै देव्यै नमो नमः ॥ ४ ॥
हृदयस्थापि सर्वेषां या न केनापि दृश्यते ।
सूक्ष्मविज्ञानरूपायै तस्यै देव्यै नमो नमः ॥ ५ ॥
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ।
यद्ध्यानैकपरा नित्यं तस्यै देव्यै नमो नमः ॥ ६ ॥
पञ्चकारणकृत्येन्द्रा यदाज्ञामेव बिभ्रति ।
साम्राज्यसंपदीशान्यै तस्यै देव्यै नमो नमः ॥ ७ ॥
वेदा निःश्वसितं यस्या वीक्षितं भूतपञ्चकम् ।
स्मितं चराचरं विश्वं तस्यै देव्यै नमो नमः ॥ ८ ॥
सहस्रशीर्षा भोगीन्द्रो धरित्रीं तु यदाज्ञया ।
धत्ते सर्वजनाधारा तस्यै देव्यै नमो नमः ॥ ९ ॥
ज्वलत्यग्निस्तपत्यर्को वातो वाति यदाज्ञया ।
ज्ञानशक्तिस्वरूपायै तस्यै देव्यै नमो नमः ॥ १० ॥
पञ्चविंशतितत्त्वानि मायाकञ्चुकपञ्चकम् ।
यन्मयं मुनयः प्राहुस्तस्यै देव्यै नमो नमः ॥ ११ ॥
शिवशक्तीश्वराश्चैव शुद्धविद्या सदाशिवः ।
यदुन्मेषविभेदाः स्युः तस्यै देव्यै नमो नमः ॥ १२ ॥
गुरुर्मन्त्रो देवता च प्रणवः प्राण एव च ।

या विराजति चिद्रूपा तस्यै देव्यै नमो नमः ॥ १३ ॥
सर्वात्मनामन्तरात्मा परमानन्दरूपिणी ।
श्रीविद्येति स्मृता या तु तस्यै देव्यै नमो नमः ॥ १४ ॥
दर्शनानि च सर्वानि यद्गीतानि विदुर्बुधाः ।
तत्तनियमरूपायै तस्यै देव्यै नमो नमः ॥ १५ ॥
या भाति सर्वलोकेषु मणिमन्त्रौषधात्मना ।
तत्त्वोपदेशरूपायै तस्यै देव्यै नमो नमः ॥ १६ ॥
देशकालपदार्थात्मा यद्यद्वस्तु यथा तथा ।
तत्तद्रूपेण या भाति तस्यै देव्यै नमो नमः ॥ १७ ॥
हेयप्रतिभटाकारा कल्याणगुणशालिनी ।
विश्वोत्तीर्णेति विख्याता तस्यै देव्यै नमो नमः ॥ १८ ॥

इति स्तुत्वा महादेवीं धाता लोकपितामहः ।
भूयो भूयो नमस्कृत्य सहसा शरणं गतः ॥

॥ नमः शिवायै ॥

agastya uvāca
anādyanantamavyaktaṃ vyaktānāmādikāraṇam ।
ānandabodhaikarasaṃ tanmahanmanmahe mahaḥ ॥
aśvānana mahāprājna vedavedāntavittama ।
śrutametanmahāpuṇyaṃ lalitākhyānamuttamam ॥
sarvapūjyā tvayā proktā tripurā paradevatā ।

pāśāṅkuśadhanurbāṇapariṣkṛtacaturbhujā ||
tasyā yantramiti proktaṃ śrīcakraṃ cakrabhūṣaṇam |
navāvaraṇamīśānīśrīpurasyādhidaivatam ||
kāncīpure pavitre.asmin mahīmaṇḍalamaṇḍane |
keyaṃ vibhāti kalyāṇī kāmākṣītyabhiviśrutā ||
dvibhujā vidyudullāsavilasattanuvallarī |
adṛṣṭapūrvasaundaryā paranjyotirmayī parā ||
agastyenaivamuktaḥ san parānandādṛtekṣaṇaḥ |
dhyāyaṃstattraipuraṃ tejo hayagrīvo mahāmanāḥ |
iti dhyātvā namaskṛtya tamagastyamathābravīt ||

hayagrīva uvāca
rahasyaṃ saṃpravakṣyāmi lopāmudrāpate śṛṇu |
ādyā puṇyaparā sā syāccitparā tvādikāraṇam ||
anākhyeti trayīproktasvarūpā tattvacintakaiḥ |
dvitīyā bhūtale siddhā parā dvibhujasaṃyutā ||
dakṣahaste yogamudrāṃ vāmahaste tu pustakam |
bibhratī himakundendumuktāsamavapurdyutiḥ ||
parāparā tṛtīyā syādbālārkāyutasammitā |
sarvābharaṇasaṃyuktā dakṣahastadhṛtāmbujā ||
vāmorunyastahastā ca kirīṭārdhendubhūṣaṇā |
paścāccaturbhujā jātā sā parā tripurāruṇā ||
pāśāṅkuśekṣukodaṇḍapancabāṇalasatkarā |
lalitā saiva kāmākṣī kāncyāṃ khyātimupāgatā ||
sarasvatīramāgauryastāmevādyāmupāsate |
rahasyaṃ saṃpravakṣyāmi lopāmudrāpate śṛṇu ||
netradvayaṃ maheśasya kāśīkāncīpurīdvayam |
vikhyātaṃ vaiṣṇavaṃ kṣetraṃ śivasānnidhyakārakam ||

kāncīkṣetre purā dhātā sarvalokapitāmahaḥ |
śrīdevīdarśanārthāya tapastepe suduṣkaram ||
ātmaikadhyānayuktasya tasya vratavato mune |
prādurāsa puro lakṣmīḥ padmahastapurassarā ||
padmāsane ca tiṣṭhantī viṣṇunā jiṣṇunā saha |
sarvaśṛṅgāraveṣāḍhyā sarvābharaṇabhūṣitā ||
siṃhāsaneśvarī khyātā sarvalokaikarakṣiṇī |
tāṃ dṛṣṭvādbhutasaundaryāṃ paranjyotirmayīṃ parām ||
ādilakṣmīmiti khyātāṃ sarveṣāṃ hṛdayasthitām |
yāmāhustripurāmeva brahmaviṣṇvīśamātaram |
kāmākṣīti prasiddhāṃ tāmastauṣītpūrṇabhaktimān ||

brahmovāca

maya devi jaganmātarjaya tripurasundari |
jaya śrīnāthasahaje jaya śrīsarvamaṅgale ||
jayeśe karuṇārāśe jaya śṛṅgāranāyike |
jaya vidyaikasiddheśi vandanīyapade śubhe ||

jaya jaya jagadamba nityarūpe
jaya jaya sannutalokasaukhyadātri |
jaya jaya himaśailakīrtanīye
jaya jaya śaṅkaravāmanetre ||

jagajjanmasthitidhvaṃsavidhānānugrahānmuhuḥ |
yā karoti svasaṅkalpāt tasyai devyai namo namaḥ || 1 ||
varṇāśramāṇāṃ sāṅkaryakāriṇaḥ pāpino janān |
nihanti yā.atitīkṣṇāstraiḥ tasyai devyai namo namaḥ || 2 ||

nāgamaiśca na vedaiśca na śāstrairna ca yogibhiḥ |
na vedyā yā svasaṃvedyā tasyai devyai namo namaḥ || 3 ||
rahasyāmnāyavedāntaiḥ tattvavidbhirmunīśvaraiḥ |
paraṃ brahmeti yā khyātā tasyai devyai namo namaḥ || 4 ||
hṛdayasthāpi sarveṣāṃ yā na kenāpi dṛśyate |
sūkṣmavijnānarūpāyai tasyai devyai namo namaḥ || 5 ||
brahmā viṣṇuśca rudraśca īśvaraśca sadāśivaḥ |
yaddhyānaikaparā nityaṃ tasyai devyai namo namaḥ || 6 ||
pancakāraṇakṛtyendrā yadājnāmeva bibhrati |
sāmrājyasaṃpadīśānyai tasyai devyai namo namaḥ || 7 ||
vedā niḥśvasitaṃ yasyā vīkṣitaṃ bhūtapancakam |
smitaṃ carācaraṃ viśvaṃ tasyai devyai namo namaḥ || 8 ||
sahasraśīrṣā bhogīndro dharitrīṃ tu yadājnayā |
dhatte sarvajanādhārā tasyai devyai namo namaḥ || 9 ||
jvalatyagnistapatyarko vāto vāti yadājnayā |
jnānaśaktisvarūpāyai tasyai devyai namo namaḥ || 10 ||
pancaviṃśatitattvāni māyākancukapancakam |
yanmayaṃ munayaḥ prāhustasyai devyai namo namaḥ || 11 ||
śivaśaktīśvarāścaiva śuddhavidyā sadāśivaḥ |
yadunmeṣavibhedāḥ syuḥ tasyai devyai namo namaḥ || 12 ||
gururmantro devatā ca praṇavaḥ prāṇa eva ca |
yā virājati cidrūpā tasyai devyai namo namaḥ || 13 ||
sarvātmanāmantarātmā paramānandarūpiṇī |
śrīvidyeti smṛtā yā tu tasyai devyai namo namaḥ || 14 ||
darśanāni ca sarvāni yadgītāni vidurbudhāḥ |
tattaniyamarūpāyai tasyai devyai namo namaḥ || 15 ||
yā bhāti sarvalokeṣu maṇimantrauṣadhātmanā |
tattvopadeśarūpāyai tasyai devyai namo namaḥ || 16 ||

deśakālapadārthātmā yadyadvastu yathā tathā ।
tattadrūpeṇa yā bhāti tasyai devyai namo namaḥ ॥ 17 ॥
heyapratibhaṭākārā kalyāṇaguṇaśālinī ।
viśvottīrṇeti vikhyātā tasyai devyai namo namaḥ ॥ 18 ॥

iti stutvā mahādevīṃ dhātā lokapitāmahaḥ ।
bhūyo bhūyo namaskṛtya sahasā śaraṇaṃ gataḥ ॥

॥ namaḥ śivāyai ॥

www.kamakotimandali.com